स्य द्वैतावलंबिनो ब्रह्मनिष्ठायोगात्तद्योग्यज्ञानभ्रंशस्तेन मोक्षो न सिध्यत्यतस्तानि नो द्वैतालंबनं त्यक्तव्यमित्याह

वांडल्लक्षणया वाचाऽपहृतचेतसां अपहृतं तिरोभावितं चेतः कार्याकार्यविवेकविज्ञानं येषां ते अपहृतचे
तसः विषयाप्रवणीकृतबुद्धयस्तेषां अत एव भोगैश्वर्यप्रसक्तानां भुज्यंत इति भोगा भोग्यपदार्थाः ऐश्वर्यं तत्सा
मीश्वरत्वं तयोरेव प्रसक्तानां तेषां समाधौ समाधीयतेऽरूपोविषयेषु नेनेति समाधिः वासनात्मना जगत्सर्वं स
माधीयते पुरुषे यस्मिन्निति वा समाधिरंतःकरणं तस्मिन्व्यवसायात्मिका बुद्धिर्योगबुद्धिः न विधीयते न भवेत्य
ते कामेरंतरत्वाभावात् न भवितितियत्नतः कारणाऽभावे कार्याभाव इति न्यायेन योगबुद्ध्यभावे तत्कार्यभूतो
मोक्षस्तेषां कदापि न संभवतीत्यर्थः ४४ एवं कामिनामानामुपक्रमोपसंहारादिषेवार्थतत्त्वतात्पर्यमहत्त्वास
र्थज्ञा विजानतामर्थवादैर्मोहितानां कामिनां योगबुद्ध्यभावादीश्वरप्रसादाऽभावस्तेनेवसत्ताराणप्रमाणाऽभाव इति
प्रतिपाद्येदानीं केवलमुमुक्षूणां योगबुद्धिमतामीश्वरमीसे कर्म कुर्वतोऽपि वचनवाक्येन मोहितत्वाभिप्रायेणानिष्ट
मात्रोसप्रबुध्यास्त्रत्वाभक्तिभ्याभीश्वराराधनात्मकं कर्म वैदिकं कर्तव्यमिति सचयितुमाह त्रैगुण्यविषया वेदाः
निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ४५ रजस्तामसः सात्त्विका इति त्रिवि
धा गुणाः त्रिगुणाः रागद्वेषलोभमोहादयस्तेषां तत्कार्याणां तत्फलानां च समाहारस्त्रैगुण्यं संसारः स एव वि
षयः कर्मतत्साधनादिप्रकाशनहारेण हीनीयत्वेन गोचरो येषां ते त्रैगुण्यविषयाः वेदाः संसारहेतवः वेदोक्तकर्मा
धीनत्वेन वेदास्त्रैगुण्यविषयास्त्वं तु त्रैगुण्यस्य वेदविषयत्वेन सर्वथानुपादेयत्वे सत्यपि नित्यनैमित्तिकादनेषु मु
मिलाद्दि निस्त्रैगुण्य इति यतस्त्वं मोक्षेच्छया योगबुद्धियुक्तः स्वधर्मप्रवृत्तत्वान्निस्त्रैगुण्यो भव अतेच्चन वक्ष्यति भो

रूपोर्थस्तावानेव गंगादिषु एप तीर्थेषु तत्र तत्र पृथक् पृथक् क्रियमाण स्नानदानादिक्रियालभ्यमानपुण्यविशेषैः
गी० टि० समानपरिमाण एव सिध्यति न ततो न्यूनायते एतेषां चाप्यन्यायेन परिच्छिन्नजलानां गंगादीनां समुद्रे तेर्भावात्
३४ एवमेव सर्वेषु वेदेषु कर्मकाण्डेषु प्रसिद्धैः कर्मभिर्योगयज्ञदानाध्ययनव्रततपोयोगादिभिरन्यैश्च पुण्यविशेषैश्च सं
पाद्यमानः स्वर्गस्थः आनंदः सार्वभौमादिब्रह्मांतः पुनः पुनः शतगुणितो यावान् भवति तावानानंदो विजानतः स
र्वमिदमहं च ब्रह्मैवेति जगत्सर्वं स्वं च सच्चिदानंदं ब्रह्मैव पश्यतो ब्राह्मणस्य ब्रह्मविद्यतेः ब्रह्मानुभवस्यासिद्धतित
तो ब्रह्मविच्छिन्नस्यानंद एव भवति स मोदते मोदनीयं हि लब्ध्वेति श्रुतेः यद्वा उदपाने सर्वतः परिद्यमानवापीकू
पतडाकनदनद्यादौ जलमध्ये विद्यमानो जलरूपोर्थो यावान् तिष्ठति तावान् स जलरूपोर्थः सर्वतः संप्लुतोदके स
मुद्रे एककोणस्थितजलस्यांशांशो भवति एवं यावान् यावे देवेषु शब्दादिविषयजातं विदंति जानंतीति वेदाः विद्यातोः
कर्तर्यच् ब्रह्मादिपिपीलिकांताः सर्वे प्राणिनस्तेषु वेदेषु सर्वेषु प्राणिषु पुण्यपापकर्मपरिपाकवशात् दिष्टार्थसान्नि
ध्ये प्रतीयमान आनंदरूपोर्थः यावान् तावान् स आनंदरूपोर्थः सर्वतः संप्लुतोदकस्थानीये ब्रह्मणि स्थितानं
दस्य लेशांशो भवति एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः एवं स्वप्रतिबिंबलेशांशमात्रे
णो ब्रह्मादिपिपीलिकांतप्राणिजातस्य तत्तत्पुण्यविशेषतारतम्येन सुखतारतम्यप्रदं सर्वतः संप्लुतोदकस्थानी रम०
यमद्वितीयं सत्यज्ञानानंदघनं परं ब्रह्म विजानतः एतदेवाहमिति स्वस्वरूपत्वेन साक्षात्कृतवतो ब्राह्मणस्य ब्रह्मविदोऽ २६
स्वं ब्रह्माकारवृत्त्या सर्वदानुभूयमानो नैजो बिंबानंद एव लेशरूप एतावानिति वक्तुं केनापि शक्यतेऽर्थः ४६ यद्यप्ये

निर्द्वन्द्व इति द्वंद्वं नामरूपे सर्वत्र तयोः ग्रहणान्निर्गतो भव नामरूपयोर्ग्रहणं मा कुर्वित्यर्थः निर्द्वन्द्वं कुर्वतो नामरूपग्रहणं
न संभवत्यतः मायातीतं विविदिषोर्निषेद्धुमाह नित्यसत्त्वस्थ इति सतो भावः सत्त्वं ब्रह्मस्वरूपं नित्यं तस्मिन्नेव तिष्ठतीति नि
त्यसत्त्वस्थो भव सर्वदा ब्रह्मण्येवानुसंधेहीत्यर्थः ब्रह्मविदः शरीरयात्रापि ब्रह्मदृष्ट्यैव कर्तव्यानुवाद्यदृष्ट्येति सूचयितुमाह नि
र्योगक्षेम इति स्थितस्यैव देहस्याहिकंटकादिभ्यस्तस्य रक्षणं पालनं क्षेमः तस्यानुकूलद्रव्यसंपादनं योगस्तदुभयस्या
पि प्रारब्धाधीनत्वात्स्वदृष्ट्या देहाभावाच्च अधिष्ठानसत्तानवलंबनेन तयोर्निर्गमं कृत्वा निर्योगक्षेमो भव ब्रह्मनिष्ठायां प्रमादः क्व
चिदपि मास्त्वित्याह आत्मवानिति आत्मा ब्रह्माकारबुद्धिः सदा सैवास्यास्तीत्यात्मवान् यद्वाहंबुद्धेर्विषय आत्मैव सदा
स्तु न क्वचित्प्रमादेनाप्यनात्मेति मत्वाह आत्मवान्भवेति अनात्मानमहंबुद्धेः क्वचित्कदाचिदपि विषयं मा कुर्वित्यर्थः
ननु ब्रह्मविदः फलत्वेन सर्वकर्मसंन्यासे साधनाभावे साध्याभाव इति न्यायेन तत्कर्मविशेषलभ्याः सुखविशेषा न सं
भवंति येत्रस्येवानिष्फलेनास्य महाहानिरित्याशंकायां न सर्वं पदं हस्तिपदे निमग्नमिति न्यायेन सत्क्रियापालभ्याः स
र्वभोगा अविद्यान्तः आनंदाः सर्वे ब्रह्मानुभवेनोत्कृष्टेनास्यापरोक्ष्य संभवंतीति सदृष्टांतमुपपादयति यावानर्थ उद
पाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ उदमुदकं पिबंत्यस्मिन्निति उदपानं ज
लाशयः जातावेकवचनेन तस्मिन्नुदपाने अल्पे सर्वत्र विद्यमाने वापीकूपतडागपुष्करिणीनद्यादौ पुराणप्रतिपे
स्नानदानाचमनादिक्रियया साध्यमानोऽर्थः पुण्यलक्षणो यावान्यावत्परिमाणकः सिध्यति सर्वतः संप्लुतोदके
सर्वत्र संप्लुतं परिपूर्णमुदकं यस्य स सर्वतः संप्लुतोदकः समुद्रस्तस्मिन्नेव स्नानदानाचमनादिक्रियया लभ्यमानः पुण्य

तेसमस्यभावःसमत्वंसदेवज्ञानेनयुज्यतेप्राप्यतइतियोगः स च अनेनतस्मिन्योगेब्रह्मणिस्वस्यस्वाद्भावायसेनदेकायेस्यानि
गी०द्वि० ष्ठतीतियोगस्थःमोक्षैककामःसन्त्वंसंगंएतेममदुरितक्षयोक्तितिमतिबंधनिवृत्तिरस्त्वितिवामसीद्तोश्वरोमह्यमितिवा
३५ कर्मजन्यंफलंमेभूयादितिवासंगःकामस्तंकर्मसुत्यक्त्वाआरब्धस्यकर्मणःसंगतासिद्धिस्तदभावोऽसिद्धिःईश्वरप्रसादप्रा
प्तिःसिद्धिस्तदप्राप्तिरसिद्धिःचित्तप्रसक्तिःसिद्धिस्तदभावोऽसिद्धिरित्यादिसिद्ध्यसिद्ध्योःसमोहर्षविषादरहितोभूत्वाकर्माणि
कुरुशास्त्रकाम्यऽपिविहितानीतिविवक्षयाकुर्वित्यर्थः ४८ मोक्षेच्छुर्यैवफलानयेक्षयासमबुद्ध्याचकर्माणिनित्या
निनैमित्तिकानिचकुर्वतेत्विजमुद्धियेद्राज्ञायतेकर्मभिस्तत्फलेश्वभोग्येनेकिमप्यस्तितुच्छेत्यलंबुद्धिसरणान्तरा
17 निकृष्टफलदेकर्मतत्परोनास्य्यपाज्ञानयोगस्वाऽऽदर्तव्यइतिबोधयति दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजयबुद्धौ
शरणमन्विच्छकृपणाःफलहेतवः ४९ बहुसाधनसाध्यत्वात्क्लेशमयत्वेनदुष्टत्वात्संगत्वेफलवैगुण्यात्संगत्वेचज
न्मादिदुःखबीजत्वादकरणोऽप्रत्यवायजनकत्वपानिरयहेतुत्वाच्चअवरंनिकृष्टंकर्मनित्यनिरतिशयमोक्षसुखहेतोर्बु
नानागाति द्धियोगात्ज्ञानयोगात्दूरेणावर्जितेदूरमेनेविपरीतेविष्टचौअविद्यापापवविद्योनिधरणाद्विपरीतभावेहेतुत्वयामोक्ष
हेतोर्ज्ञानयोगस्यदूरमेवभवतिअहोदशोत्कमवरंयेषुकर्मेतिकृतात्कमवरत्वेकर्मणोहिशब्दोद्योतयत्यतःकर्म
नोस्येयमितिभावः ननुबहवःकर्मयोगमेवानुतिष्ठन्तिकथंकर्मावरमित्यतआह कृपणाइति कर्मजन्यफलस्यस्वर्गस्यसु २७
खस्यवाप्यैहिकस्यहेतवःकर्मफलहेतवःकर्मफलार्थिनःकामिनोयेतएवकृपणाअधमानीचाः योवाएतदक्षरंगार्ग्यविदि
त्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतिः विशिष्टजन्मकर्मशीलगुणवतोप्यजानतएवब्रह्मतत्वंकर्मिणोअधमत्वं

वंलक्षणसंपन्नस्यैव ब्रह्मवित्तमस्य सर्वकर्मसंन्यासे अधिकारस्तथापि शोकमोहाविष्टत्वादिधर्मैर्विचार्यमाणो नेतद्व
स्यांतःपिदृश्यते ततस्तव कर्मण्येवाधिकारो न तु ज्ञाने नापि च संन्यासे इति वदन् शोकधाकृतश्रवणानामप्यनुदितात्म
ज्ञानानां मुमुक्षूणां स्वधर्मानुष्ठानमेव श्रेयस्करं ते त्वं न कदाचिदपि त्यक्तव्यमिति निष्कर्षमाह कर्मण्येवाऽधिकारस्ते मा फले
षु कदाचन मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ४७ मुमुक्षोस्तव श्रुतिस्मृतिभ्यां विहिते काम्यवर्जिते नित्ये नैमि
त्तिके च कर्मण्येवाधिकारो योग्यता नात्मज्ञाननिष्ठायां संन्यासे वेत्यन्ययोगव्यवच्छेदार्थ एवकारः तत्रापि कर्मफले
षु यज्ञो दानं तपश्चैव पावनानीति धर्मेण पापमपनुदतीति नित्यानामपि फलश्रवणात्तत्फलेषु मा तेऽधिकारो
ऽस्ति योग्यता कदाचिदपि कर्मफलेष्वपेक्षां न कुर्वित्यर्थः कर्मफलेष्वपेक्षितेषु सत्सु बीजे सत्यंकुरवत्पुनर्जन्मार
यो दुःखमयः स्यादेवेत्यतस्मान्मा कर्मफलहेतुर्भूः यथा स्वर्गकामो स्वर्गफलहेतुस्तथा त्वं मे न कर्मफलहेतुर्माभूः
कर्मफलेष्वपेक्षावान्माभवेत्यर्थः ननु फलमनपेक्ष्य तत्रापि क्लेशरूपमप्रधानं कर्म कर्तुं न शक्यते तेन तदपेक्षया तत्त्यागः सुखावह
इत्याकांक्षायामाह न मुमुक्षोः कर्मत्यागो न युक्त इत्याशयेनाह मा त इति अकर्म कर्मव्यतिरेकः क्रियासाङ्ग इति यावत् तस्मिन्न
कर्मणि ते सङ्गो मनःसक्तिर्मास्तु अकरणे प्रत्यवायस्तेन नरकोऽधर्मोऽपि स्यात् ततो मुमुक्षोः कर्मसंन्यासो न युक्त इ
त्यर्थः एतेन कर्मफलानपेक्षया श्रद्धया वेश्वरस्यार्थं भक्त्या कर्म कुर्वन्नेव मोक्षो नान्यथेति सूचितं भवति ४७ ज
न्मादिदुःखनिःश्रेयसनिमित्तापेक्षैव तेऽस्ति चेत्तर्हि त्वं कर्मैव कुर्विति रूपदिशसि योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनं
जय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८ निर्दोषं हि समं ब्रह्मेति वक्ष्यमाणं ब्रह्मात्र समपदेनोच्य

शेषनिवृत्त्यः संभवाद्युक्ताः प्रायश्चित्तादयो पद्धे देनेनक्षिप्तेतैस्तदेव निवर्त्यते नेतरदन्यथाप्रायश्चित्तभेदविधाऽनर्थप्र
गी०द्वि० संगात् नरनिति ब्रह्महत्सायो यो मे येन यजन इति ब्रह्महत्याव्यतिरिक्तपापनरणप्रश्वरणाकृते प्रायश्चित्तादो पापस्ये
२६ वनिवृत्तिर्नतु सर्वपापस्य तत्कोविनकदिदेतोः नहि सर्वपापस्यनिवर्त्तकमस्तिमहत्साधनं विनात्मज्ञानं तदाविद्वान्सर्व
पञ्चाति पापैर्विध्यते न सम एवं विद्वान्नेते आत्मानं स्पृणुते इति स्मृतावन्नेवास्ति उभे सुकृतदुष्कृते स्पष्टः पापपुण्ययोभ
यात्मकेषु कर्मसु निवर्जितेषु समत्वयोगो ज्ञानयोग एव कौशलं कुशलमेव कौशलं निपुणत्वं तानकुलेदं ईश्वर श१
मसाधनं कौशलं तस्माद्योगाय युज्यस्वेति एवं शास्त्रान्वयः जहातीहेत्यत्र संधिरार्षः ५० फलानपेक्षया समबुद्ध्या
चेसम्यगनुष्ठितनित्यनैमित्तिककर्मपरिपाकसंजातचित्तशुद्धेः फलमन्तःपाः श्रवणादिजनिताः विक्रियाः आत
18 त्त्वविज्ञानसिद्धेः फलमाह कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छन्त्यनाम
यं ५१ बुद्धियुक्ताः बुद्धिः साम्यबुद्धिः ब्रह्मात्मैकत्वविज्ञानं तया युक्तास्तन्निष्ठां संपन्ना हि ज्ञानयोगनिष्ठाः खलु म
नीषिणो विद्वांसः कर्मजं कर्मभ्यः संचितादिभ्यो जातं नानायोनिसहस्रमापकं फलं जन्मादिलक्षणं त्यक्त्वा निषिद्धा
पायैर्नैमित्तिकैः प्रायश्चित्तैरनिवर्त्यं च तत्तो नाग्निना सर्वपापविकर्मणां दाहे सति तत्फलो नां च जन्मादीनां दाहसं
भवात् न तस्य कर्मफलाभवेति आत्मनः कूटस्थत्वात् असंगत्वविज्ञानशक्तिबलेन विद्वांसः स्वयं कर्मफलाविषया एम०
मस्त्वेत्यर्थः जन्मबंधविनिर्मुक्ताः जन्मनां बंधः संबंधो यस्य सः जन्मबंधो देहस्तज्जरकाले भावि वर्तमानश्चतेन विनि ३८
मुक्ताः कारणाभावाद्भाविदेहबंधरहितास्तादात्म्याभावाद्वर्तमानदेहसंबंधरहिताश्च संतः स्वयमिह जीवंत एवानाम

ब्रवीति एतच्छ्रेयो ये भिनंदंति मस्तान्रामस्थं ते पुनरेवापि यंति यत्कर्मिरागेण भवेरघंति रागात्तेनातुराः क्षीरालो
कास्थवं तरतिः कर्मिरागां कर्मफलमोहितानां ब्रवीति क्रतिरनर्थमेव अतो धीराः अमृतत्वं विदित्वा ध्रुवमध्रुवेष्वि
हन प्रार्थयंत इति एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकिरतीह सोम्य ज्ञानादेवानु कैवल्यं यथा चिरात् सर्व
पापं प्रपोह्य परात्परं पुरुषमुपैति विद्वानित्यादिश्रुतिभिर्विवेकवतो मोक्षप्रसंगः त्वमेतस्यैव प्रसंगेनैवविद्वे
कर्मफलत्वं च श्रूयते यस्मात्तस्मात् धनंजय बुद्धौ सांख्यबुद्धौ चित्तप्रसादप्रसादितज्ञानयोग एव शरणं वा संसम संपादि
न सोऽन्विच्छातं नैव मनः स्थापय नवचित्तं प्रसादं प्रसीदति तदा स्यज्ञानयोग एव तिष्ठ अवरत्वाद साधनत्वादनात्मना
त्मता धीहेतुत्वाच्च न कश्चित्कर्मराशि तत् श्रेयः एतेनैव यावच्चित्तप्रसादस्तावदेव कर्म साधनं मुमुक्षोः अतः परं ज्ञा
नयोग एवेति सत्वितं तेन यावज्ज्ञानं प्रसिद्धो न प्रयत्न बुद्धिरेवेति सिद्धं ४९ मुमुक्षोर्जन्मादिहेतूनां सर्वेषामपि कर्म
णां निःशेषनिवृत्तिर्ज्ञानयोगबलेनैव सिद्ध्यति नान्येनात स्वतंत्रेवनिष्ठां कुर्वित्ति बोधयति बुद्धियुक्तो जहातीह उभे
सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५० बुद्धिः सांख्यविषया निरुक्तोत याप तः ज्ञानयो
गयुक्तो ब्रह्मविदात्मैः स्व स्य कृत्स्याः संगविदात्मत्वविज्ञानबलेनैव इहलोके जन्मांतरसहस्रसंधुनात्
नोत्सजेः भोग शुभवकृते नानायोनिसहस्रमायके उभे सुकृतदुष्कृते जहोतिज्ञानाग्निना निर्मलात्मा जीवन्नेव मुक्तो
भवति यस्मात्स्मात्वं योगाय ज्ञानयोगाय युज्यस्व यतस्व ननु कृच्छ्रचांद्रायणादिप्रायश्चित्तैस्त्रिसुपर्णादिजपैर
श्वमेधादियागैर्गंगादिमहानदीस्नानदानैश्च सर्वपापक्षयो भवति किमर्थं ज्ञानयोगाभ्यासक्लेश इति चेत्तन्नैवं

स्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते कुत्रचिदुपास्तिविशेषास्तत्फलविशेषास्तन्महत्त्वविशेषाः प्रतिपाद्यन्ते कुत्रचिद्द्वलस
गी०टी० गुणां तन्माहात्म्यं तत्फलस्य औत्कृष्ट्यं च प्रतिपाद्यते कुत्रचिन्निर्गुणं ब्रह्म तत्त्वतो नेतन्माहात्म्यं तत्फलप्राशस्त्यं च प्रति
३७ पाद्यते एतत्सर्वं श्रुतवतो विप्रतिपत्तिः किं सर्वेषां प्राधान्यं वा उत सगुणस्य वा उत निर्गुणस्य वा उत्तोभयेषां वेत्येवं श्रु
तिवाक्यैर्विप्रतिपन्ना संशयाविष्टा बहुविक्षेपवती ते बुद्धिः प्रतयाशात्स्र सर्वमवलोड्य श्रुतिस्मृतिपुराणबलेन गुरु
रूपदेशेन च सर्ववेदाः परमात्मनं नीतिन्यायेन सर्वं स्माविशात्स्य महातात्पर्यं निर्विशेष एव ब्रह्मणि पर्यव
सितमिति परिज्ञाय विप्रतिपत्तीः सर्वाः परित्यज्य निश्चला निर्विशेषाभ्यासे समाधौ समाधीयते चित्तमस्मिन्निति स
माधिः परं ब्रह्म तस्मिन्नतदाकारे रोवा वाचलाचलत्वं न हेतं बाह्यवासनानाशाद्विक्षिप्तानिश्चला सती यदा स्थास्य
ति तदा योगमवाप्स्यसि योगलक्षणमवाप्स्यसि यद्वा संस्तानमनंतं ब्रह्म सर्वं ब्रह्मैव नेह हैतदात्म्यमिदं सर्वं सद्वीदं सर्वं चिद्वीदं सर्वं
13 तत्त्वमसि अयमात्मा ब्रह्मेत्यादेतदुत्पा एवं मनन्यपरमनंतरमवाह्यं ब्रह्मैवेदं सर्वमित्यादिश्रुतिभिः सर्वस्य ब्रह्ममात्रत्व
प्रतिपत्तिजनकाभिर्विशेषप्रतिपत्तिमनो यासां श्रुतिविप्रतिपन्ना सर्वं ब्रह्मैवेति श्रुतिभिः संभाविताविशिष्टा
नवतीस्यर्थः तत एव निश्चला विक्षेपनिर्मुक्ता नहि परमात्मप्रवाकस्य श्रवणेनान्याधिष्ठानसंदर्शनेन वासदुद्धेवि
प्रतिपत्तिर्विक्षेपो वा संभवत्यत एवं सम्यक् श्रवणेन मननेन च संपन्ना ते बुद्धिः समाधावचलाप्रज्ञानारख्ये अच
लानिवातस्थदीपवन्निश्चला निष्कंपा भूत्वा यदा यस्मिन्काले चित्तपरिपाकावस्थायां स्थास्यति स्थिता भ राम०
विष्यति तदा त्वं योगं ज्ञानयोगमवाप्स्यसि योगारूढो भविष्यसीत्यर्थः ५३ श्रवणमननाभ्यां विज्ञाता २९
त्मतत्त्वस्य विदुषः समाधिना प्राप्तस्थैर्यस्य बुद्धिः किंलक्षणा स्थितप्रज्ञस्य लक्षणं वित्तानुकामोऽर्जुनः पृच्छति अर्जुन उवा

प्रमाध्यात्मिकादिसर्वोपद्रवरहितं नित्यशुद्धबुद्धमुक्तस्वभावमखंडानंदैकरसं परं पद्यते ज्ञायतेनेन प्राप्यत इति प
दं परं ब्रह्म गच्छंति अविद्याकृतेवासनाकृतेन मध्येन्य भावं परित्यज्य ज्ञानेवमेव प्राप्नुवंतीत्यर्थः हि विद्वदनुभवद्योतनार्थः
र्थः ५१ चित्तशुद्धिजन्यं सर्वत्रालंबुद्धिलक्षणं वैराग्यं प्रशस्तोऽध्येयं लक्षणां योगं कदा केन वा प्राप्स्यामीत्यभिप्रायम
र्जुनस्यालक्ष्य यदा तव बुद्धिकालुष्यनिवृत्तिर्यदा वाग्मतानिर्विकल्पा भवति तदा वैराग्यं योगं च प्राप्स्यसीत्येतत् द्वयं श्लो
कद्वयेन क्रमेण प्रतिपादयति यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२
मदसद्विवेकरूपं न्यतपातेः करणमनस्ते विषयेषु रम्येष्वरम्येष्विष्टमनिष्टं ग्राह्यमग्राह्यमिति येन रागद्वेषमूलेन मन्ये
वेदाप्रवर्तेते तदेव मोहकलिलं मोहो विचित्रता विषयजातमेतत्सर्वं ममसम्यापि केतु छुमितिविवेकाभावः यदायं
रितानेन देहकलिलं कालुष्यं दर्पणस्य स्थलजीपटलवद्विवेकबुद्धेरावरणमेव लक्षणं मोहकलिलं ते बुद्धिर्यदा व्यति
तरिष्यति यदिदं मनसा वाचा वक्तुमशक्यं श्रवणादिभिः नेश्वरं प्रोक्ष्यमाणं च विद्धि मायामनोमयमिति सोऽछिवना
र्थस्य सम्यक् ग्रहणजन्येन विवेकमात्मसलक्षेतद्ध्यमानेन सर्वं मिथ्येवेति निश्चयेन यदा स जानीते तदा श्रोतव्यस
श्रुतस्य च द्रष्टव्यस्य हेयस्य च ज्ञातव्यस्य ज्ञानस्य च गृहीतस्य ग्राह्यस्य च वस्तुनो मिथ्यात्वमेव विज्ञाय निर्वेदं वै
राग्यं सर्वत्रालंबुद्धिलक्षणं गंतासि प्राप्स्यसि व्यवहार्यस्य मिथ्यात्वात् व्यवहारस्य मिथ्यार्थगोचरत्वान्निष्फले
नानेन मम किमिति सर्वस्माद्व्यवहारात् व्यवहाराद्वा परतो भविष्यसीत्यर्थः ५२ एवं मुमुक्षोः तेन योगसिद्धेः सा
धारणाकारणं वाप्यो परमयां निरूप्याधुना योगसिद्धेरकारमाह श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३ नानाश्रुतिभिः स्मृतिभिः पुनश्च विचित्रमं विशेषप्राप्तं तत्फलविशेषा

भोजापत एव न निःशेषेण कामपरित्यागः संभवतीति चेन्न वाच्यः विषयेषु कामोदयो विषयस्वभावो वा किंवा
गी० टी० रुषस्वभावो वा नाद्यः द्वेषेण परागौदौ भोक्तृष्वपि सः कामानुदयात् न द्वितीयः कान्तासे त्रिधीवालस्य कामादर्शि
३८ नात् नहिं कथं कामोदय इति चेदुच्यते कामजानामि नेमूलं संकल्पात् किलजायसे इति स्मरणात् कामः संकल्पमूल
कः संकल्पो वासनामूलकः न हि वासनया विना वस्तुनि समीचीनत्वबुद्धिरुदेति समीचीनत्वबुद्धिं विना कामोपि ने
यद्येनेततः कामोत्पत्तेः कारणं विषयेषु भोग्यत्ववासनैव वासना नाम भोगजन्यसंस्कारः भोग्यत्ववासनाबला
देव विषयेषु कामः प्रवृत्तिर्भुजेत्तं नोतदृष्टं लोकशास्त्रप्रसिद्धं विदुषस्तु नित्यं निरंतरं समाधिनिष्ठायामेवति
ष्ठतः सदा सर्वत्र ब्रह्मैव पश्यतो विषयग्रहणं न संभवति प्रत्यगात्मनापश्यतो घटग्रहणं यथान यासर्वं ब्रह्मात्म
नापश्यतः तस्माद्विषयवासनाः स्वयमेव क्षीयंते तासां क्षये कामाः स्वयमेव विनश्यंति स्वयमेव विनश्यतो
20 कामानां नाशो विदुषि ह्युपचर्यते प्रजहातीत्युपदेश प्रभयान पश्यतत्तमसो नाशनं सूर्यः करोतीतिवद्यतस्त
वेनतत्त्वमस्ति ह्यनिर्वासनं त्वं विदुषो लक्षणमिति तिनेदिदं निर्वासनत्वं समाधिना साधकस्य संपादनीयमित्यवसितं च ५५ निष्कृतेद
इदं मुमुक्षोरवश्यं साधनीयं साधनमिति सूचयितुं स्थितप्रज्ञस्य लक्षणांतरमाह दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरा
गभयक्रोधः स्थितधीर्मुनिरुच्यते ५६ दुःखेषु दुःखप्रापकेषु ज्वरशूलशिरोवेदनादिष्वाध्यात्मिकेषु चोरव्याघ्रादिष्वा
धिभौतिकेषु वर्षवाततापादिष्वाधिदैविकेषु दुःखप्रदेषु प्राप्तेषु सत्स्वप्यनुद्विग्नमनाः अनुद्विग्नं क्षोभरहितं मनो यस्य गच्छामीति राम०
विक्षेपपर्यायादिधुरं मनो यस्य सो अनुद्विग्नमनाः समाधिनिष्ठया तेन रक्षोभितचित्त इत्यर्थः तथा सुखेषु सुखप्रापकेषु स्रक्च ३०
न्दनादिषु स्वयं प्राप्तेषु विगतस्पृहः विगताविशिष्टा निर्गता स्पृहा रसनेंद्रियलौल्यं यस्य स विगतस्पृहः स्वानंदरसास्वा

च स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ५४ स्थितप्रज्ञ
स्य स्थिता ब्रह्माकारेणाभिप्लावाद्यानवगाहिनी प्रज्ञा बुद्धिर्यस्य स स्थितप्रज्ञ आरूढ तस्य भाषा भावे वा
का कदाचिद्ध्याति समाधिस्थस्य निरंतरं नियमेन समाधिं कुर्वाणस्य समाधिनिष्ठो निरतो विद्वान् परि
तैरयं स्थितप्रज्ञ इति कदा भाष्यत इत्यर्थः स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभाषेत किमासीत किं व्रजेत कथं तिष्ठति
कथं चरति किं वदतीत्यर्थः ५४ सिद्धस्य लक्षणानि यानि तान्येव साधकस्य साधनानि प्रयत्नेन संपाद्यानि येषु सिद्धेषु
सत्स्वेव विद्वत्प्रज्ञास्थैर्यं विदेहकैवल्यं च सिध्यतस्तानि मुमुक्षोर्यत्नेन साधनीयानीति सूचयितुमध्यायपरिसमाप्तेस्ता
न्येव प्रतिपाद्यंते तत्रादौ प्रथमप्रश्नस्योत्तरमाह श्रीभगवान् प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् आ
त्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ५५ आरागादिना सम्यग्विज्ञातात्मतत्त्वो मुमुक्षुः समाधौ वर्तमानो मनो
गतान् मनसैवानुद्रष्टव्यमिति श्रुतेरागत आत्मस्वरूपप्रकाशनेकाकारतो मनस्येव स्थितान् विषयान् कामयंती
ति कामाः विषयभोगेच्छाः तान् सर्वान् यदा यस्मिन्काले समाधिसिद्धिदशायां प्रजहाति निःशेषं परित्यजति विष
याशानां निःशेषपरित्यागे हेतुमाह आत्मनीति स्वतः सिद्धे नित्ये कूटस्थासंगचिद्रूपे च सुखरूपे सर्वत्रोप
लभ्यमान आनंदैकरस आत्मनि स्वस्वरूपे क्रीडन् रममाणो ब्रह्मविदात्मना स्वस्वरूपेणैवो केवलं स्वरा नतु दृष्टः स्वा
त्मानंदरसानुभवस्यैव संतोषं तन्निश्चयाप्याप्यमृतरसापायीत्व गतो बुधस्तु तुच्छं विषयसुखं नापेक्षते तेन तेन एवन हुषपा
रकामान् सर्वान् प्रजहाति यदैवं लक्षणो भवति तदा स्थितप्रज्ञ इति परमितिपरितेः रूच्यत इत्यर्थः पदालवे प्रमुच्येत ते
का मायेष्यति क्रतेर योगेन प्रतिपत्तिर्भवति नतु विषयेषु कामो वर्तते एव तत्र हृष्टो विद्वषो वितदनुभवतो का

येभ्योऽभयाद्रागादिदोषप्रसक्तिभयात्समाधिविघ्नभयाच्च वागादीनि चक्षुरादीनि च सर्वशः सर्वतोऽपि प्रत्याहृत्य स्वस्मिन्नुपसंह
गी॰ टि॰ रते समाधिस्थैर्याय तन्त्र तन्त्रवृत्तिं वा रचयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः ५८ ननु निरिंद्रियाणां विषयेभ्यो वै मुख्यक
३९ रणां प्रज्ञास्थैर्ये प्रकारान्तरमित्येतदप्युक्तप्रायं किंचित्कार्यमुद्दिश्य सर्वेन्द्रियनिग्रहेण तत्त्वातिष्ठति पुरुषे इंद्रियनिग्रहो हि यस्य तेन
नु प्रज्ञास्थैर्यमिति चेन्न तस्य रागवत्त्वेन ब्रह्मसत्तानंतनिष्ठो च न संभवतीति सूचयितुमाह विषया विनिवर्तन्ते निराहारस्य दे
हिनः रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ५९ आह्रियंते विषया येस्ते आहारा इंद्रियाणि तानि यमाद्यैस्तेभ्यो निवर्तितो यः
स निराहार इंद्रियनिग्रहवान् तस्य देहिनः देहमेवाहमिति सदहंबुद्ध्यालंबनत्वेनास्यास्तीति देही देहाद्यभिमानी तस्येंं
द्रियाणां निग्रहीतत्वाद्विषयाः रूपादयः सर्वे विनिवर्तन्ते विशिष्य निवृत्ता भवंति रसवर्जं रागं विना रसो रागे गुणे
२। द्रव्ये रस्याभिधानादस्तो रागो न गच्छति रागे लिंगमबोधस्येति नियमात् सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्मत्वमा
त्रत्वज्ञानं रागघ्नं तेन तद्रूपमेकं चरस्यानुरक्तोऽन्यतो रागवत्त्वादेवास्य बोधाभावस्ततएव रे इंद्रियत्वेपि न प्रज्ञास्थैर्यं प्रसक्तिरि
त्यर्थः तर्हि कथं तस्य रागनिवृत्तिः प्रज्ञा च सिध्यतीत्याकांक्षायामाह रसोऽपीति अस्य मौनेनेन्द्रियनिग्रहेण प्रज्ञा हि नाचरित
मुद्रौस सांप्रवरागादिजन्यत्तानेन परं परं ब्रह्माद्वितीयं दृष्ट्वा इदमेवाहमस्मीति स्वात्मना साक्षात्कृत्य तन्तोरसो निवर्तते निर्गच्छ
ति विषयेष्वयोग्यत्वभावनानित्या रागनिवृत्तिः भोग्यत्वभावनानुव्रत्यदृष्ट्या निवर्तते सर्वस्य स्वस्य च ब्रह्ममात्रत्वावगमात्रिना राम॰
भोक्तृभोग्यत्वादिभेदत्वेन निर्द्रगर्वे सति तदाश्रितत्वात्तेन सहैव स्वयं च दग्धो भवतीत्यर्थः अपि शब्दात् प्रज्ञास्थैर्यं च सिध्य ३१
तीति सूचितं भवति ५९ यत एवमतः सिद्धमुमुक्षुणोपेतैः सर्वस्य ब्रह्ममात्रत्वज्ञानसंपादने प्रागेव बाह्येन्द्रियादिनिः शेषनिवृत्तये नि

दासत्त्वात्तेषां दुःखरहितइत्यर्थः वीतरागभयक्रोधः उपकारिणि रागः प्रीतिः स्वंतापकारिणि क्रोधोऽप्रीतिरासन्ने
मरणहेतौ भयं चैतत्त्रितयं स्वात्मनिष्ठया वीतं नष्टं येन स वीतरागभयक्रोधः प्रीत्यप्रीतिभयहेतूनां प्रीत्यादीनां
तत्कार्याणां चाविषयीभूतइत्यर्थः दुःखादिषु विषादाद्यनुदये हेतुमाह मुनिरिति कृतं दृष्टं स्पृष्टं च सर्वं अन्यकेदृष्टा ब्रह्मैवमनुते
पश्यति जानाति न तु तत्तदाकारो भवति मुनिर्ब्रह्मनिष्ठः एवंलक्षणोपः स्थितधीः स्थितप्रज्ञः सिद्ध उच्यते इत्यर्थः एतेन दुः
खादिषु बाह्याऽनालंबिन एव सद्ब्रह्मनिष्ठा निष्ठावत एव सम्यक्त्वात्तन्सम्यक्तानिन एव विदेहमुक्तिरिति सूचितं भवति सेसिद्धे
ब्रह्मैवेच्यतिरेपन्त्सुसंपन्त्सु नदैविहृदतिकिंतुन स्वात्मैव स्वात्मना तिष्ठतीति किं प्रभाषेतेत्यस्य प्रश्नस्योत्तरं स्पष्टं ५६ अत्र
णादिनाविज्ञातात्मतत्त्वो विदेहकैवल्याधीर्नसन्तानपरिपाकाप समाधौ महत्तः साधको परवं वजेतेतस्य वज्ञाननिष्ठा सि
ध्यतीत्याह यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७ यः समाधौ मह्नत्तो यतिः प्रज्ञा
सर्वत्र कंथाकौपीनादिपरिग्रहे देहजीवनेपि अनभिस्नेहः असंगासक्तिरहितो भवति प्रारब्धवशादागतं शुभमनुकूलं
तन्नाभिनंदति पदाः शुभं प्रतिकूलं न द्वेष्टि हर्षविषादरहितो भूत्वा सर्वत्र समबुद्धिः सन्समाधावेव तिष्ठति तस्यैव प्रज्ञा प्र
तिष्ठिता स्यात्तस्य ज्ञाननिष्ठा सिध्यतीति नेतरस्येत्यर्थः ५७ यद्यपि ज्ञाननिष्ठासिद्धेः महद्दैर्घ्यं तीव्रमोक्षेच्छा नस्वरत्वे चैतन्त्रि
तपमेवकारणं तथापींद्रियनिग्रहाभावे वैराग्यादितानं निष्ठा च न सिध्यतीत्यतः साधकस्य यत्नेत इंद्रियजयः संपाद्यः प्र
ज्ञासिद्धे इत्याह यदा संहरते चायं कूर्मोंगानीव सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८ यो यं ज्ञाननिष्ठा
पाश्रद्धेतो यतिर्यथा कूर्मः स्वांगानि परेभ्यो भयात्सर्वशः सर्वाणि तत्तत्काले स्वस्मिन्नेवोपसंहरते तथा हृदिंद्रियार्थेभ्यः तत्तद्विष

श्यतिनत्वात्माज्ञाननमरणतरंगमालिनिसंसाराब्धौपततित्वात्स्वपंचविद्यान्नविनश्यतीतिविदुषोपिविहिमुक्तस्यजन्मादिदुःखप्र
गी॰ टी॰ वाहपातः नयापित्वमेवफलंननुमुक्तिःकारणाभावात्रणाहेषाभ्यांविषयेषुप्रविष्टस्यविदुषोपिविषयाभिध्यानमेवभ्रसज्जते
ननुब्रह्मध्यानमितिसर्वानर्थमूलंविषयाभिध्यानंतत्कार्यंचप्रतियादयतिद्वाभ्यां ध्यायतोविषयान्पुंसःसंगस्तेषूपजाय प्रीतिः२
६२।४० ते संगात्संजायतेकामःकामात्क्रोधोभिजायते ६२ क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धि हा
नाशात्प्रणश्यति ६३ विषयान्शब्दादीन्ध्यायतस्तेषुसम्यक्त्वमस्मद्यतेवरंदंभोग्यमितिवाचिंतयतःपुंसःसंगस्तेषुरम्य
त्वाकारेणवाभोग्यत्वाकारेणवाभाविनेषुभोग्येषुप्रीतिःमात्रंतसंस्कारदासक्तिरूपजायतेसद्यउस्यद्यतेसंगात्त्रीसा
नेत्रममानुनाभवितव्यमितिकामोभोगेच्छावेगःसम्यक्जायतेप्रत्तोपेनाऽभोग्यमपिकलंजादिस्त्रैणंभगिन्या
दिवाभोग्यत्वबुध्याभोक्तुंत्वरयतेपुरुषःकामाद्येनकेनापिप्रतिबंधेनहतात्क्रोधोभिजायतेपरस्परोक्ततात्मनः
22 परोपकारणहेतुबुद्धिविद्वेषःक्रोधःक्रोधात्संमोहोवैचित्त्यंकार्याकार्यविवेकभ्रन्यताजायतेक्रोधाविष्टःखलुसंमो
हेनमहतामप्यपचरतिगुरुमपिधिक्करोतिसंमोहादुक्तलक्षणात्स्मृतिविभ्रमोजायतेवेदांतश्रवणजन्यतानेनत्र
ह्मैवाहमितिपुनःपुनःकृतःस्वानुभवसंस्कारजस्तदाकारपरिणामिबुद्धिवृत्तिविशेषःस्मृतिरित्युच्यते तस्याविभ्रमो
भ्रंशः स्मृतिहेतुभूतस्यविस्मृतेरनुदयः तस्मात्स्मृतिभ्रंशाद्बुद्धिनाशःबुद्धिर्ब्रह्मणीवृत्तिःतस्याःस्वविषयकस्मृ राम॰
तिविनाप्रणाशोभवति यथावदेवर्तिमेवपुरुषेष्ठत्रेरतिस्मृतिरस्तिचेन्ममायंपुत्रेरतिपत्राकारेणबुद्धिर्जायतेप्रातस्मृ ३२
तुस्मृत्यसंभवात्पुत्राकाराबुद्धिर्नजायतेतथाब्रह्मणापरोक्षेपिविषयाभ्यामोहाक्रांतचित्तस्यविदुषःस्वविषयकस्मृत्यभा

ष्ठः ? त्तये विदेहमुक्तये चेति विदेहकैवल्यसिद्धेः कारणम् । तत्र त्यक्तानस्यसम्यक्त्वसिद्ध्ये समाधौ प्रवृत्तस्य यतेरिंद्रियनि
ग्रह एव आदावेव स्यकर्तव्यस्तदभावे महाननर्थ इति सूचयितुमाह यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमा
थीनि हरंति प्रसभं मनः ६० हि यस्मात्कारणाद्यततः समाधिना तानेस्यात्मप्रतिबद्धत्वसिद्धये प्रयत्नं कुर्वतः समाधौ
तिष्ठतो यतेरित्यर्थः विपश्चितः विषयजातमापिकमसत्तुच्छमिति विषयस्वरूपनिर्वधायमवतीति च विजानतोपि पुरुषस्य मुमु
क्षोर्मतः मनुतेऽनेनेति मनः सर्वज्ञमदवलोकनकारणं इंद्रियाणि प्रमाथीनि प्रमथितुं विषयदर्शनमात्रेण व्याकुलीक
र्तुं शीलं येषां तानि प्रमाथीनींद्रियाणि रागादिदोषग्रस्तानि प्रसभं बलात्कारेण स्वपक्षयतः सतो विवेकयुक्तमपि मनः ह
रंति ग्रहीत्वा विषयेषु पातयंति स्वरूपात् आवयंतीत्येतदिंद्रियनिग्रहमकुर्वतः स्वरूपभ्रंश एव विदुषो महाननर्थः यस्मा
देवं तस्मात् तानि सर्वाणि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ विषयेषु पुनः पु
नर्दोषदर्शनेन वंधकत्वभयेन वैराग्यद्वेषाभ्यां वियोजितानि तानींद्रियाणि सर्वाणि संयम्य तेषु प्रवृत्तिं निरुध्य तत्र होल
केषु स्वापयित्वा ब्रह्मविद्यतिर्युक्तो योगेन युक्तः समाहितचित्तः वृत्ते ब्रह्माकारतामापाद्येत्यर्थः मत्परः अहमेव
परः परमात्मेति परस्मिन्नेव ब्रह्मण्यहंधीर्यस्य स मत्परः सर्वमिदमहं च ब्रह्मैवेति सर्वं स्वं च ब्रह्मैव पश्यन्नासीत मत्परः इत्यासेवे
दाति ष्ठेदित्यर्थः एवं नित्यं निरंतरं पश्यतो यस्य यतेरिंद्रियाणि विषयग्रहानवकाशतयानीरागाणि सत्वावशेषवश्यानि भवं
ति तस्य हि स्थिरतुष्टप्रज्ञा प्रतिष्ठिता निश्चला भवति सो स्थितप्रज्ञ इति ध्यातिनैवेतरस्येत्यर्थः नन्विंद्रियैरंतःकरणे विषयेषु पातितेऽपि चे
देनास्य किं दुष्यः को वानर्थ इति चेद्विषयाभिध्यानमेव सर्वानर्थबीजं तेनानर्थहेतुपरंपरा ऽ यततीति पापार्वैकत्वचिंतानेविन

गी० टि० निर्मलात्मनस्तस्य बुद्धिः सर्वत्र ब्रह्मदर्शनी भत्तायथेवति हने भति स्थिता भवतीत्यर्थः ॥ ६४ ॥ नित्यानित्यविवेकवैराग्याभ्यां तीव्रमुमु
४१ क्षया च सर्वं संन्यस्य मुमुक्षवो ये यतयः श्रवणं कुर्वन्ति तेषां मुक्तिः सम्यक् ज्ञानेन विना न सिध्यति सम्यक् ज्ञानं च समाधिं विना
समाधिश्चेन्द्रियनिग्रहं विना च इन्द्रियनिग्रहो विविक्तिः तेषां रागादित्यागं विना न सिध्यति एततोऽपि कौन्तेयेत्यादिना रागद्वेष
परित्यागमिन्द्रियनिग्रहं समाध्यनुष्ठानं च प्रतिपाद्य ध्यायतो विषयान्पुंसः इति ज्ञानिनोऽपि बहिर्मुखस्य ज्ञाननाशोपायेन
यन्निपातं प्रतिपाद्येदानीं वक्ष्यमाणतत्त्वविवेकादीनां तत्पक्षपातं न मोक्षो आत्मानं केवलार्थं भजमानस्य मुमुक्षोरा
लस्येनाऽमेधया च ध्यानादावश्यकत्वात्तस्य समाधिरेव एवं कर्तव्य इति सूचयितुं तदकर्तुरनर्थमाह नास्ति बुद्धिरयुक्त
स्य न चायुक्तस्य भावना न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६ ॥ शतधा श्रुतवेदान्तोऽपि यस्तीव्रमुमुक्ष
या शान्तो दान्त उपरतस्तितिक्षुर्भूत्वाऽपि वक्तृतानुसिद्धये समाधिं न करोति तस्यायुक्तस्यासमाहितचेतसोऽयुक्त
२३ स्य बुद्धिः सर्वत्र ब्रह्मदर्शनलक्षणा विजातीयमात्रैकलभ्या श्रेयस्कृद्दृष्टिर्नास्ति बहुधा कृतेऽपि श्रवणे नेदं तत्त्वं ज्ञानेय
द्वाक्यार्थगोचरमेव भवति न तु वस्तुगोचरं तस्य बुद्ध्यात्मचिज्ज्ञानमपि न तिष्ठति स्थिरमित्यर्थः अयुक्तस्येति
पुनरुक्तिः समाधेरेव यत्कर्तव्यत्वद्योतनार्था कारणाऽभावे कार्याभाव इति न्यायेन अयुक्तस्य समाधिशून्यस्य ब्र
ह्मपरोक्षता नास्त्यस्य भावना न च नास्ति देहद्वयम् इदमेवाहमस्मीति स्वात्मना साक्षात्कृतब्रह्मरूपे वात्मत्वाभि
निवेशो भावनानन्तादात्म्यापत्त्या स्वस्य ब्रह्मरूपे वस्यैव स्थितः ॥ हं बुद्धिलक्षणापासा चाप्ययुक्तस्य न संभवतीत्यर्थः
व तत्संभवे तत्कार्यं च न संभवतीत्याह न चाभावयत इति अबुद्धोपपादेहतया ब्रह्मैवाहं तत्र इत्यात्मानं ब्रह्मैवाऽभा एम०
वयतोऽमन्यमानस्य ब्रह्मात्मना स्वयमत्नीकतोपते ः शान्तिरनात्मतादात्म्यतत्कार्यसंबंधाऽदर्शनलक्षणा बोध ३३

वादिदमहं च ब्रह्मैवेति दृश्याकारतामुत्सृज्य जगतः स्वस्य च ब्रह्माकारत्वावगाहि स्वरूपं ज्ञानात्मिका चिन्मयी वृत्तिर्नोपजायते किं
तु भोक्तृभोग्याकारवृत्तिभिः स्वपतिरोहितात्मत्वान्नष्टा भवति एवं स्वविज्ञानविनाशाद्धि ह्यात्मस्वरूपमपि नश्यति प्रकर्षेण
नश्यतीति प्रणश्यति संसारकारागारे पतितत्वान्न कदाचिदपि मुक्तिं न प्राप्नोति विषं पिबतोः मरणमिव असन्मार्गे प्रविष्टस्य
सकृतिनैष्ठं भवस्ततो विषयारण्यमवकाशमदत्वा सर्वेन्द्रियाणि गृह्य एवं कं समाधिं कुर्वत एव सम्यक् ज्ञानं तत्फलं च सिध्यतीति
सिद्धं ६३ वश्येन्द्रियैर्विषयग्रहणाभावे विदुषः कथं शरीरयात्रा भवत्वित्याशंकायां न तथाकारेणि संसमाधिमनुतिष्ठत
श्चित्तप्रसादं भगवान्प्रतिपादयति रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४
रागद्वेषवियुक्तैः रागद्वेषयोर्बीजं विषये विशिष्टत्वादिबुद्धिरेव दोषदर्शनेन तस्यापास्तत्वात् इन्द्रियाणि रागद्वेषवियु
क्तानि भवन्ति तैः रागद्वेषवियुक्तैः विषये सम्यक्त्वमुच्छत्वं वैधकत्वबुध्या रागद्वेषाभ्यां वियोजितैरित्यर्थः नेतरे वात्मव
श्यैरात्मनः स्वस्य वश्यैः संकोचव्याकोचयोर्वशवर्तिभिः प्रसन्नैरिन्द्रियैस्तु विषयानन्नरसादीन् निषिद्धानत्र
लंबुद्रिः ६ पिप्रमाणज्ञानमात्रपर्याप्तान् चरन् भुंजानो ब्रह्मविद्यातिविधेयात्मा विधेयः इन्द्रियमुधासमाधिनो चेन्निर्मुक्तरागादिदो
षतया मुक्तत्वेन स्वाधीन आत्मा मनो यस्य स विधेयात्मा स च प्रसादं चित्तस्य स्वास्थ्यमत्यंतनिर्मलतां गच्छति आहारशुद्धौ
सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिरिति श्रवणादिन्द्रियशुद्ध्या चित्तशुद्धिः सिध्यतीत्यर्थः ६४ नित्यसमाधिनिष्ठया चे
न्द्रियाणां मनसश्च शुद्धिलक्षणं प्रसादं संपादितवतो विदुषस्तस्मिन्सिद्धे फलमाह प्रसादे सर्वदुःखानां हानिरस्योपजायते
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५ इन्द्रियशुद्धिसिद्धेः प्रसादे प्राप्ते सत्यस्य विदुषः सर्वदुःखानां अतः दुःखश
देन तद्धेतवो विक्षेपालस्यं तेनैषां सर्वेषां हानिर्विनाशः उपजायते ततएव शीघ्रमाशु च प्रसन्नचेतसो

नाभिरुच्चावचाभिराकृष्टं मनो विषये वा कर्मणि वा योगे वा प्रवृत्तौ वा व्यवहारे वान्यत्र वा यातनपि त्वा वाउ
गी॰व॰टी॰ नौ व निव विवक्षं मयतीत्यर्थः ६७ यस्माद्रागद्वेषलोभमोहादिदोषैरेवेन्द्रियप्रवृत्तिस्तया समाध्यऽभाव
स्तेन ज्ञानाऽभावस्तेनैव ब्रह्मणि स्थानान्यऽहंभावाऽभावस्तस्मान्मुमुक्षोऽभावस्तत्स्वऽभावश्चैवमन थ
४२ ज्ञानाऽप्राप्तो रागद्वेषादिभिरिन्द्रियाणि प्रत्यक्षं कृत्वा बहिः प्रवृत्तस्य ज्ञानिनो वित्तस्यादिन्द्रियग्रामं रागा
दिभिर्वियोज्य सम्यक् निगृह्य च मुमुक्षोर्यत्नेर्विदेहमुक्तये समाधिरेव संपादनीय इति सूचयितुमाह त
स्माद्यस्य महाबाहो निगृहीतानि सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८ रागा
दिशत्रुसंहारसमर्थस्यैवात्राधिकारो नान्यस्येति सूचनार्थं महाबाहो इति संबोधनं यस्य मोक्षैकार्थिनो
यत्नेरिन्द्रियार्थेभ्यः सर्वाणीन्द्रियाणि निगृहीतानि भवन्ति तीव्रवैराग्येण तस्यैव धन्यस्य समाधिः सि
२५ द्धा तिमता प्रतिष्ठिता भवति विदेहमुक्तिरग्रे तिष्ठतीति तत्त्वं ६८ जन्मानेकशतसहस्रकृतसु
कृतपरिपाकेन कस्याचापीश्वरप्रसादयोगक्लप्सा भवतो यस्य समाधिना सर्वमिदमहं च ब्रह्मैवेति ब्र
ह्मा परोक्षविज्ञानमुत्पन्नं भवति तस्य महात्मनः स्थितप्रज्ञस्य प्रबुद्धस्य स्वप्नव्यवहारवद्देहप्रभे
दनिस्यादिव्यवहारो लौकिको वैदिकश्च निःशेषो विनिवर्तते निद्राकद्वाविद्यापानिःशेषविनष्ट राम॰
त्वान्नकार्यस्यापि निःशेषनिवृत्तिरतः प्रबुद्धो जागरस्थः जीवन्मुक्तो ब्रह्मविद्वरिष्ठ एव आरमति ३४
नान्यत्रेति प्रतिपादयति या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा निशा

शांतिं नेति ध्यातिकिंच अशांतस्य ॥ नात्मानमेवात्मानं द्वैतं च पश्यतः सुखं नित्यं निरंतरं ब्रह्मसुखं कुतः सर्वमिदमहं च ब्रह्मैवे
ति सर्वं स्वं च ब्रह्मैव पश्यतः स्वयमेव ब्रह्मानंदरसानुभवः स्यात् नहि विपरीतदर्शिनः कुतः सिध्यतीत्यर्थः पद्यानचाऽभावयतः शां
तिः श्रुतं दृष्टं स्पृष्टं मतं विज्ञातं स्वयं च सर्वं चिद्रूपं ब्रह्मैवेति सर्वस्य चिन्मात्रत्वमखंडाकारचिदात्मिकया वृत्त्या नित्यं निरंतर
मभावयतोऽपश्यतो विदुषः शांतिर्विदेहमुक्तिः सच्चिदानंदैकरसब्रह्मरूपेणावस्थानलक्षणा नास्ति एवमशांत
स्य विदेहमुक्तिमप्राप्तस्य सुखं विदेहकैवल्यसुखं कुतः ब्रह्मभावमप्राप्तस्य ब्रह्मसुखं न सिध्यतीत्यर्थः ॥ ६६ ॥ नयुक्त
स्य बुद्धेः श्रवणादिजन्यज्ञानस्य माध्यभावेपि न नश्यति यथा मेधाविनाऽधीतमीमांसादिशास्त्रजन्यज्ञानं मेधया
प्रतिष्ठितमेवमवतिष्ठते वेति चेन्नेदृक्काव्यनाटकादिज्ञानमतिस्थूलमपि मुहुर्मुहुरखलोऽनंतरश्रवणं चावाविनान
स्फुरेत् प्रतिभाति किमु बज्ञानमतिसूक्ष्ममतीन्द्रियमविषयमप्रचुरमसंस्कृतमज्ञानाकृष्टमविनष्टप्रतियस्य मात्मतत्त्वज्ञानं सम्य
ग्ध्यानाभ्यासेन प्रतिभातीति तत्र तत्त्वस्थित्यै मुमुक्षोः समाधिः कर्तव्य इति सत्यं च पि तु बाह्यैः प्रबुद्धस्य तत्र नाशनप्रकारं सदृष्टांत
माह ॥ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥ हि यस्मात्कारणादिंद्रिया
णां श्रोत्रादीनां वागादीनां च स्वस्वविषयेषु चरतां सतां लोके स्वस्वविषयकर्मवासनाभिसंविष्टं यन्मनोऽनुविधीयते विदु
षा न तन्निरोधावतारस्वेच्छानुरूपं प्रवर्त्यते तदेव मनः अंभसि नदीजले वा पूर्णवामिवा स्वस्ववासनानुरूपं प्रवर्तमान
स्यास्य विदुषः प्रज्ञां आत्मानात्मविवेकबुद्धिं हरति संहरति अत्रायमभिप्रायः नद्याः परपारं गच्छंती नौ कामं
ति कूलो वा पुर्व्वहीनाम महाऽऽवर्तैस्तां पातयति जलेनापूर्य वा मज्जयति महापापारोनाऽस्मिहृत्समंजेयति पुनरपा
रं वा विषमस्थाने वा गमयति सर्वथाऽनर्थवतीमेव करोति पश्चात् यथा विदुषोपि प्रज्ञां विवेकबुद्धिं अनाद्यविद्यावास

तिप्राकृतमेव व्यवहारं न करोति कुत एवं लक्षणस्यास्य विदुषो वैदिकव्यवहारः सिध्यतीत्यर्थः यद्वा अधीहि
गी०टी० भगवो ब्रह्मविद्यां वरिष्ठामित्यादिश्रुतिप्रसिद्धाया ब्रह्मविद्या सर्वभूतानां सर्वेषां प्राणिनां निशा भवति सु
४३ षुप्तिदा कृत्यास्वरूपभावत्वकारूपापि सुषुप्तिष्वपनानां निशेव भवतीति निशोच्यते यथा प्रसिद्ध नि
शा स्वकीयतमः प्रज्ञया नामरूपभेदमयास्य सर्वस्य वस्तुजातं तमोमात्रं कृत्वा स्वयमेव सर्वत्र विजृंभते त
थैवैषा ब्रह्मविद्या स्वकीयचिच्छक्त्या नामरूपभेदमयो ह्यसर्वं दृश्यजातं चिन्मात्रं कृत्वा स्वयमेकैव सर्व
त्र विजृंभते यत्र निशापामिव अज्ञातसंज्ञा सुष्ठु सर्वे भावेस्या न रूपान् स्वभासूपश्यंतः शेरते तस्यां ब्र
ह्मविद्यायां संयमी बहिःप्रवृत्तिशून्यः स्थितमतो ब्रह्मविदेकस्व जागर्ति आत्मरतिरात्मक्रीड आ
त्ममिथुन आत्मज्योतिरात्मानंदो भूत्वा सर्वदाऽऽस्ते यस्यामविद्यायां सर्वाणि भूतानि जाग्रति त
४५ महमिदं मम इति व्यवहरंति सा त्वऽविद्या हि तावस्यां पश्यतो द्रष्टादर्शन दृश्यं च सर्वं मिथ्यैवेति
पश्यतो ब्रह्मविदो निशा भवति यथा प्राणिनां ब्रह्मविद्या निशा तथा ब्रह्मविदोप्यऽविद्या निशा
ब्रह्मविद्यया ब्रह्मैवाहमिति स्वमानंदैकरसं परिरूपं विषयीकर्तुं यथैवाऽऽतानशक्नुवंति तथैवायं ब्रह्मविदवि
द्यया हं ममेदमिति देहेंद्रियादिकं विषयीकर्तुं न शक्नोतीत्यर्थः तत एवास्य लौकिके वैदिके च कर्मणि प्रवृत्तिः न वि स्म०
कारः यौगपद्याभावात् यस्य देहतदाश्रितवर्णाश्रमाद्यभिमानः फलार्थित्वं ममेदं कर्तव्यमिदं न कर्तव्यमितिवि ३५

पश्यतो मुनेः ॥ ९८ ॥ प्राचीनकर्मफलानुभुक्त्यै पुनः पुनर्भवंति जायंते इति भूतानि प्राणिनस्तेषां सर्वे
षां भूतानां स्थितेरतिरिक्तानां सर्वभूतानां या निशा भवति नैजः परस्यां देवतायामित्यादिश्लोकस्थको या
परदेवता सर्वप्रमाणाऽगोचरा निर्विशेषा सन्मात्रा स्वरूपा निशेव भवति यथा निशायां निद्रायां ते प्राणिनो पंच
सानि शानतिस्तारणात्रिः सर्वव्यापकत्वेन हेतोः अवेद्युमशक्यत्वेन सर्वपदार्थानां स्वमात्रत्वापादनेन च भू
तानां मनुष्यादीनां व्यवहर्तुमशक्या भवति तथा सर्वपरदेवतापि सर्वव्यापकत्वादिधर्मैः सर्वभूतानां
व्यवहर्तुमशक्यत्वात्रिशेत्युच्यते ॥ अमुत्वं नितरां सुखस्वरूपत्वात्रिशान्तत्वात्रिशायामन्तं तत्सुख
रूपायां परस्यां देवतायां परब्रह्मरूपानंदघनेस्वरूपमविद्यानिद्राप्रबुद्धः संयमी बहिःप्रवृत्तिनि
वृत्तसर्वेन्द्रियो ब्रह्मविदेक एव जागर्तीति जैवारमति क्रीडत्यानंदति तदन्ये तु शेरते न वेदांताअ
पि निद्रिताइव तत्स्वरूपं किमपि न जानंतीत्यर्थः ॥ यस्यामविद्यायां दृष्टृदर्शनदृश्यादिभेदवत्यां भूता
नि जाग्रति अहं ममेदमिष्टमनिष्टमिदं कार्यमिदमकार्यमिति व्यवहरंति सा तत्त्वऽविद्यादैतप्रपंचः पश्यतः
दृष्टारं दर्शनं दृश्यं च सर्वं प्रत्यक्षं ब्रह्मैवेति पश्यतो मुनेर्ब्रह्मनिष्ठस्य निशा भवति यथा निशायां
प्राणिनो न व्यवहरंतीति तथा यमविद्यानिशायामहं ममेति न व्यवहरति अहं ममेत्यादिप्रत्ययहेतु
नामनाद्यविद्यावासनानां निःशेषविनष्टत्वेन तत्तदुद्बुद्धत्वमध्यासः प्रत्येकमशक्यत्वादतो हं ममेदमि

मत्तोरमेवैकमाश्रित्यतदेकालंबनात्वात्तत्रैवरमतेतेनैवतुष्यतिहृष्यत्यानंदतिनान्यत्र रागेतिपश्यतिस्मरतिस्पृश
गी०टी० तिस्वपंयतिब्रूतामत्त्वात्तत्रैवतिष्ठतितच्चेवयस्यकृत्यंविद्यते ॥ प्रज्ञास्समाधिनाश्रौष्ठौम्पदेहंप्राणामिन्द्रियजातंयस
५४ र्वंदूरतः परित्यज्यसच्चिदानंदैकरसंपरंब्रह्मैकमेवाश्रित्यतदेकालंबनात्वात्तत्रैवारमंतेक्रीडंतोनंदंतीतुष्यंती
हृष्यंतीसतीपतिव्रतावन्नान्यत्तुरागेतिपश्यतिमनुतेविजानातिस्वपंसदातदात्मनातिष्ठतिसएवजीवन्मु
क्तिसुखंविदेहकैवल्यसुखंचविंदतीति सत्यपातुस्थितमतस्यपतेर्भिक्षादावपिप्रवृत्तेर्बाह्यानालंबनत्वमेवप्र
तिपादयतिश्रीभगवानेवंलक्षणएवयतिर्विदेहमुक्तिंप्राप्नोतिनान्यविधइतिनिर्द्धारयन् आपूर्यमाणमच
लप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत् तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ७० गंगा
नर्मदागोदाकृष्णाकावेरीसिंध्वादीनांमहानदनदीनांदशशतसहस्रसंख्याकेभ्योमुखेभ्योअतिपरिपूर्ण
मवद्भ्यः समागतैरनेकैर्महाप्रवाहैरपरिमितैःसमंतादापूर्यमाणमपिस्वयमचलप्रतिष्ठं अचलाच
२८ लनवर्जितामर्यादातत्स्वीयपल्लक्षणामनतिक्रांतानावृद्धिक्षयप्राप्ताप्रतिष्ठाजलस्थितिमर्यादायस्यसोऽचल
प्रतिष्ठस्तंप्रवाहाःप्रवेशकालइवप्रवेशकालेप्येकरूपेणसंतावित्तिप्रपञ्चतयावर्तमानमित्यर्थः स
दैकरूपेणैवतिष्ठंतंसमुद्रमापःगंगासिंध्वादिमहानदीनांनानामुखेभ्यःसमागतानिजलानिनानावि रामं०
धवर्णरसगंधगुणकत्ववंत्यआपोयद्वत्प्रविशंतिस्वकीयशुक्लनीलारुणपीतादिरूपविशेषंमधुरा ३६
म्लतिक्तकषायादिरसविशेषंपरिमलरसोदिगंधविशेषंलघुत्वगुरुत्वादिगुणविशेषंदृष्ट्वाद्वित्रिचतुः

पासु गुणदोषदर्शनं च विद्यते तेन तस्यैव कर्मणि योग्यता दृश्यते न तु फलस्पृहारहितस्य न हि निस्पृहनिरं
तरसमाधिनिष्ठया निरुद्धचित्तान्तःकरणेनाऽविद्यातत्कार्यं च अध्यासादिकं निर्मलत्वं ब्रह्मत्वतादात्म्यमापाद्य
ब्रह्मैवाहमिति सर्वदा ब्रह्मरूपेण वर्तता त्वं नास्ति कृतो विदुषः पुनः शरीरेण तादात्म्यापत्तिः तत्राहंममेत्यभिमान
स्य संभवेति तदसंभवेन तत्रारोपितवर्णाश्रमादिधर्माभिमानोपि नास्ति ध्वनितं तदभिरूपेण सर्वमिथ्यात्वदर्शिनः क
र्माभिसंध्यसिद्धेः किं चासु गुणदोषदर्शनाऽसिद्धेश्च तस्मादेवं न विदुषः कर्मण्यधिकार उपपद्यते सर्वमि
थ्यात्वदर्शनस्य प्रवृत्तेश्च परस्परविरुद्धत्वादेकाधिकरणत्वाऽनुपपत्तेः वस्तुनः सत्यत्वनिश्चयपूर्विका
प्रवृत्तिः भ्रमकल्पितत्वनिश्चयपूर्वकं मिथ्यात्वज्ञानं जनतयोः परस्परविरुद्धत्वमेकाधिकरणत्वा
नुपपत्तिश्च ननु कर्तृकरणकार्यं च सर्वं मिथ्यैवेति विदुषः कर्मणि प्रवृत्तौ मिथ्यात्वेन कृते कर्मणि बाधायनभ
वतीति चेन्न मिथ्यात्वज्ञानस्य प्रवृत्तिविरोधात् इदं जलं किं तु मरुरेवेति जलमिथ्यात्वदर्शिनः तत्पिपासापि
प्रवृत्तदर्शनात् किं तु तारोपितं दृश्यं सर्वं मिथ्यैवेति तदधिष्ठानं ब्रह्मैव सर्वत्र पश्यतः प्रवृत्तिरनुपपन्नेत्यस
तोऽस्य विद्यावतः स्वकर्मण्यधिकारो ननु विद्यावतः विद्यापि अविद्यातत्कार्यविरोधित्वाद्विद्यावतिब्र
त्वविद्याऽविद्यातत्कार्यं च तेन सा वर्तमानः स कार्यं स्यात् नु नश्यत्येति यत एवं ततो विधिविधानं विधेयं त
था तां च सर्वमाविद्यकं मिथ्यैवेति विजानतो ब्रह्मविदः सदात्मनात्मन्यवस्थितिर्विना न किंचित्क
र्तव्यमस्तीति सिद्धं ॥ ६९ ॥ यथा कृत्स्नकार्यं कर्तुमतां भूतावेशजनितां नरके भाजनं च सर्वं स्वजनं तथा

द। चोदना मां यास

वमरोजलमिवब्रह्मण्यद्वितीयेद्युः विद्यमानमेवद्वैतंकल्पयित्वा अहंभोक्तेदंभोग्यमित्यऽस्ताभिसंधितया
गी०टी० वाह्यवासनाभिरस्नात्महंताममताभिनिवेशेन बद्धः सन्निदंरम्यमिदमिष्टमित्यादिभेदबुद्ध्या नामरूपादि
५५ विशेषविभागेन पदार्थान्गृह्णाति पश्यति ततः कामकामी भेददर्शी शांतिं न प्राप्नोति देहादितादात्म्यायसा
पोऽसदभिनिवेशेन ब्रह्मण्यद्वितीये भेदं पश्यति स एव कामकामी द्वैतदर्शी न मुक्तिं न प्राप्नोतीत्यर्थः
उरा श्रीपी॰अ तथा च श्रुतिः यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवति तत्त्वेव भयं विदुषोऽमन्वान
राश्रलपं। स्येति नहि देहतादात्म्यं विना भेददर्शनं कामना च सिध्यति नापि देहतादात्म्यं चाविद्यां विना संभवत्यविद्या
वतो मुक्त्यभावो युक्त एव यतस्ततः कश्चित्कदाचिदपि देहतादात्म्यापत्त्या भेददृष्टिर्न कर्तव्या विदेहकै
वल्यार्थिना यतिनेति सिद्धं एवं श्लोकेनानेन चतुर्भ्यां महाराजादावपि स्थितप्रज्ञो ब्रह्मविद्यतिर्ब्रह्मात्म
27 नाब्रह्मण्येवतिष्ठति न कचिदप्यनात्मनीति किमासीतेति प्रश्नस्योत्तरं दत्तं ७० यस्माद्ध्यायतो विष
यानित्यत्र विषयाणां ध्यानं रागो न दर्शनेन च विनैव केवलध्यानमात्रेण कामाद्युत्पत्त्या विभ्रंशाद्विदुषो
विप्रणाशः प्रतिपादितः किमुत ब्रह्मनिष्ठामुत्सृज्य बाह्यदृश्यान्विषयानिंद्रियैर्गृह्णतो भुंजतो पश्य
तो विहरतो कामकामिनः प्रणाश इति तस्माद्विदेहकैवल्यार्थिना यतिना ब्रह्मविदा सर्वं यावद्विषय राम०
ग्राहमुत्सृज्य सर्वेंद्रियनिग्रहपूर्वकं सदात्मनिष्ठया स्थातव्यमेवं यस्तिष्ठति स एव विदेहमुक्तिं विंदतीति ३७
प्रतिपादयति विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः निर्ममो निरहंकारः स शांतिमधिगच्छति ७१

पंचषट्समाष्टनवदशशतैकष्टत्रु समानरूपरसादिविशेषं तन्नामविशेषं च परित्यज्य समुद्रभावमेव यथा
गच्छंति समुद्रमाप्येतत्संबंधमहिम्ना नामरूपगुणविशेषैर्यथा समुद्रान्न भिद्यंते इत्यर्थः ॥ तद्वत्कामा यं
प्रविशंति काम्यंते नामभेदेन रूपभेदेन रसभेदेन गंधभेदेन पाकभेदेन च विविधस्वरूपं तद्विति कामा भोग्य
पदार्थास्तत्पाऽऽरप्परसान्नोदय तत्तदन्ये च भोग्यविशेषा अचलप्रतिष्ठं नानाविधैर्नामरूपरसगंधपाक
संस्कारादिविशेषैर्विचित्रैरनेकैर्भोग्यविशेषैः सर्वतोऽनिच्छा प्रारब्धादेव समागमे एवमापूर्यमाणमांगहारा
मांगहारोति दानजनहारसमंतात्पतद्भिर्व्याकुलीक्रियमाणमप्यचलप्रतिष्ठमवेलानिर्विकल्पावि
परीतभावमप्रमनोद्भुत्या नेदमापाममप्याहारादौ सदाकारतामापाद्य सदात्मनैव निश्चलीभूय स्थिता
ऽवंज्ञकारहतैः स्थितिर्यस्य सोऽचलप्रतिष्ठः तेदानीमपि बाह्यानंकल्प्यसमाधिनिष्ठयाविपरिणा
मरहितान्तःकरण इत्यर्थः ॥ तमचलप्रतिष्ठमेवं पंब्रह्मविदं यतिं सर्वे कामाः प्रविशंति यं ब्रह्मनिष्ठं प्राप्य
सर्वे विषयाः प्रिज्ञावापन्ना अध्यात्मदृष्ट्या प्रविलापिताः संतः स्वकीयनामविशेषं रूपविशेषं गंधवि
शेषं पाकविशेषं संस्कारविशेषं रसादिविशेषं च परित्यज्य समुद्रप्रविष्टमहानदीजलानि समुद्रभाव
मिव स्वपंचब्रह्मभावं गच्छंतीत्यर्थः ॥ य एवं [illegible] लक्षणो ब्रह्मविद्यतिः स एव पंडितमविद्यामयं चोप
एकमलक्षणं विदेहमुक्तिमाप्नोतीति न तु कामकामी कामान् विषयानयः कामयते स कामकामी स्वपंके
वल्पकारणाभ्यनां ब्रह्मनिष्ठां स्वधर्मं परित्यज्याऽनात्मन्येवात्मभावमापद्य भोक्ता स्वरूपमुक्तो रजनम्